A.

Acc 28/108

28

~~40~~

63 (3sk4

॥ श्रीराम ॥

॥ अथ लग्न चद्रिका प्रारम्भ पत्रा संख्या ६३ ॥

॥ श्रीराम ॥

सं० च्
॥१॥

श्रीगणेशाय नमः॥ ॐ॥ तंमिश्रा जग रमसं जोजीवति भतसं॥ तं वंदे प
रमानंदं सर्वसाक्षिणमीश्वरं॥१॥ तनुर्धनंच भ्राताच सुहृत्पुत्रो रि
पुस्त्रियः॥ मृत्युश्च धर्मकर्मायिव्ययः भावः प्रकीर्तिताः॥२॥ विषमो
थ समः पुंस्त्री क्रूरो क्रूरश्च नामतः॥ चरस्थिरो द्विस्वभावो मेषाद्या रा
शयः स्मृताः॥३॥ दुश्चिक्यं स्यात् तीयेश्च चतुर्थे सुखसद्मच॥
कंध संज्ञाच पातालं हिबुकं पंचमी बधीः॥४॥ द्यूनं द्यूनमथा मयास्तं
च जामित्रे सप्तमे स्मृतं॥ दशमे चांबरं मध्यं छिद्रं स्यादष्टमे गृहे॥५॥
एकादशो भवेल्लाभः सर्वतो भद्रमेवच॥ द्वादशेचगृहे [illegible] रिष्फं त्रिको
णं नवपंचम॥६॥ त्रिलाभ दश मारीणां भवेदुपचयाभिधा॥ चतुर्थे

राम
॥१॥

५०

ष्टमयोः संज्ञा चतुरस्रं स्मृता बुधैः ॥७॥ केंद्रं चतुष्टयं कंटकं लग्नास्त दशम
चतुर्थराशीं ॥ संज्ञापरतः पनफर मापोक्लिममथ ऋ मतः ॥८॥ वर्गोत्तमा
नवांशाश्चरादि प्रथम मध्यमांत्याः ॥ होरा विषमेर्के द्वौ समराशौ चन्द्र
सूर्य्ययोः क्रमशः ॥ शुक्र जीव शनि भृत नयश्च वाराणपं ५ शैलाष्ट ८ पंच ५
विशिखा ५ समराशिमध्ये त्रिंशांशका विषमध्ये विपरीतमस्या ॥९॥ स्व
कारुत द्वादश भागात् द्रेकाणाः प्रथमं पच ॥ नवमानाधिपानां नवां
शकाः ॥ मेषाद्याश्चत्वारः सधन्विमकराद्यपावला ज्ञेयाः ॥१०॥ द्वाद
शांशाः ॥३॥ स्वप्नसंधिः शशि ४ मव नालि ८ मषान्त १२ राशिमध्ये सं
धिः ॥३॥ मेषो वृषमथो कर्को मकरश्च धनुर्द्धराः ॥ पृष्ठोदयाः स्मृताः

सू० वं०
॥ ३ ॥

पंच यात्रायां नैव शोभना: ॥ ११ ॥ सिंहा द्वयश्च चत्वार: कुंभो युग्मं दि
वा बला: ॥ शीर्षो द्वयाश्च मीनस्तु बली रात्रौ तथा दिने ॥ १२ ॥ होरा चं
द्रे रवि भौम: पापो राहु शनि स्तथा ॥ बुधो पितैर्युतः पापो होरा राश्य
र्ध मुच्यते ॥ १३ ॥ रवींदु भौम: गुरु ज्ञ शुक्र शनि राहु वा: ॥ स्वासि
न्मित्रारि ॥ चत्वारि परस्मिन शत्रव: स्मृता: ॥ १४ ॥ मेषे रवि वृषे चंद्रो
मकरे च महीसुता: ॥ कन्यायां रोहिणी पुत्रो गुरु: कर्के झषे भृगु: ॥
१५ ॥ शनिस्तु लायां मुद्धश्च मिथुने सिंहिकासुता: ॥ उच्चा: सप्तम
गा नीचा राश्यौ वा यदि वांशके ॥ १६ ॥ च्युर्थो भोगी धनी ज्ञाता
जायते मंडलाधिपा: ॥ नृपति श्चक्रवर्ती च ख्याद्येरुच्चकै ग्रहै: ॥ १७ ॥

राम
॥ ३ ॥

सं०

त्रिभिः स्वस्थै भवेन्मंत्री त्रिभिरुच्चै र्नराधिपः त्रिभिर्नीचै र्भवेद्दास त्रि
भिरस्तं गतैर्जडः ॥१८॥ उदितः स्वग्रहस्य [illegible] मित्र गेहे स्थितो पिवा ॥
मित्रवर्गे न दृष्टश्च सग्रहः सुकृतास्पदो ॥१९॥ दशमे बुध सूर्य्यंच भौम
राहु च षष्ठगौ राजजोगो नयो जातः सपुमन्नायको भवेत् ॥२०॥ आदौ
जीवः शनिश्चान्ते ग्रहामध्ये निरन्तरं ॥ राजयोगं विजानीयात्कुलम्वेव
ल संयुतं ॥२१॥ सहयस्थो यदा जीवो मृत्युस्थाने यदा सितः निरंतरं ग्रहाम
ध्ये राजा भवति निश्चितं ॥२२॥ जीवो वृषे बुधा [illegible] रसि मिथुने मकरे
कुजे ॥ सिंहे भवति सौरिश्च कन्यायां बुध भास्करौ ॥२३॥ तुलायां भस्तु
राचार्य्ये राजयोगो भवेदयं ॥ अत्रजोगे समुत्पन्नो महाराजो भवेन्नरः
२४॥ अष्टमे द्वादशे वर्षे यदि जीवति मानवः ॥ सार्वभौमस्सदा राजा

र॰ चं॰
श्री

जायते विश्वपालकः ॥ २५ ॥ एको जीवो यदा लग्ने सर्वे जोगास्तदा शुभाः
दीर्घजीवी महाप्राज्ञो जातको नायको भवेत् ॥ २६ ॥ धने शुक्रश्च जी
मश्च भौमश्च मीने जीवसुते बुधः ॥ नीचस्थो शनि चंद्रो वै राजयोगो
भिधीयते ॥ २७ ॥ च्चास्मि योगे च यो जातः स राजा धन वर्जितः ॥ दाता
भुक्ताच विख्यातो मान्यो मंडलनायकः ॥ २८ ॥ मीने शुक्रो बुधश्च
... धने राहुस्तनौ रविः ॥ सहजे च नवे चंद्रो मे राजयोगो भिधीयते ॥ २९ ॥
सहजे च यदा जीवो लाभस्थाने च चंद्रमाः ॥ स राजा ग्रह मध्यस्थो
विख्यातः कुल दीपकः ॥ ३० ॥ शुभग्रहा शुभ ... भवंति यदि केंद्र
गाः ॥ तदा शुभानि कर्माणि करोत्येव हि जायते ॥ ३१ ॥ उच्चस्थाने

राम
श्री

गता: सौम्या केन्द्रस्थाने भवंति चेत् ध्रुवं राज्यं भवेत्तस्य स्ववंशानां च
पोषका: ॥ ३२ ॥ धने व्यये तथा लग्ने सप्तमे च जदा ग्रहा: नवमे गास्त
दा ज्ञेया स्ववंस्या नायको भवेत् ॥ ३३ ॥ स्वक्षेत्रस्थो यदा जीवो
बुधः शौरिश्च जायते ॥ तस्य जातस्य दीर्घायु: संपदश्च भवंति हि ॥
३४ ॥ मीने वृहस्पति: शुक्रश्चन्द्रमाश्च यदा भवेत् ॥ तस्य जातस्य
राज्यं स्यात्पत्नी च बहुपुत्रिणी ॥ ३५ ॥ पंचमस्थो जदा जीवो दशमे
स्थश्च चन्द्रमा: ॥ स राज्यवान्महाबुद्धिस्तपस्वी च जितेन्द्रिय: ॥ ३६ ॥
सिंहे जीवस्तुला कीट चापे च मकरेपि च ॥ ग्रहा यदा तदा जातो
देशभागी [illegible] भवेन्नर: ॥ ३७ ॥ तुलाकोदंडमीनस्थो लग्नस्थो पि

लं० चं०
॥ ९ ॥

शनैश्वरः॥ करोति भूपतिर्जन्म अन्यराशौगतायुषः॥ ३८॥ विद्या स्थाने यदा सौम्याः कर्मस्थाने च चन्द्रमाः॥ धर्मस्थाने यदा सौम्याः राजयोगस्तदोच्यते॥ ३९॥ मकरेच घटे मीने वृषे मिथुन मेषयोः॥ गुरुस्तदाहि विख्यातो राजा भवति मानवः॥ ४०॥ बुध भार्गव जीवाश्च युक्तो राहुश्चतुष्टये॥ कुरुते कमला रोग्यंपुत्र मानादि कंफलं॥ ४१॥ चतुर्थे भवने शुक्र गुरुश्चंद्र धरासुताः॥ रविसौरि युतः संति राजा भवति निश्चितं॥ ४२॥ अष्टमेच व्यये क्रूरो मध्यंच क्रूर सौम्यकौ॥ राजयोगो ज्ञेयो यातश्चत्वारिं शत्समजीवति॥ ४३॥ लग्ने शौरिस्तथा चन्द्र स्त्रिकोणे जीव भास्करौ॥ कर्मस्थाने भवेद्भौमो राजयो

राम
॥ ९ ॥

१०

गोभिधीयते॥४४॥ नवमेच यदा सूर्य्यः स्वगृहस्थो भवेत्तदा॥ तस्य
जीवति नभ्रातास्यात्कोपि [illegible] स्थैसमः॥४५॥ द्विचतुर्थे सुते षष्ठे
कर्मण्यायापि यदा ग्रहाः॥ राजयोगं विजानीयात् जातस्त्वेकको
भवेत्॥४६॥ लग्ने क्रूरो व्यये सौम्यो धने क्रूरश्च जायते॥ राजयोगो
राजा च दाता दारिद्र्यनाशः सदा॥४७॥ लग्ने क्रूरो व्यये क्रूरो धने
सौम्यो यदा भवेत्॥ सप्तमे भवने क्रूरो परिवारक्षयं कुरुः॥४८॥ ल
ग्ने क्रूरो व्यये सौम्यः धने क्रूरश्च जायते॥ राजजोगत्रयो जातो दा
रिद्र्य धनवर्जितः॥४९॥ धने च दूरस्थ शौरिश्च मेषे जीवो यदा
भवेत्॥ दशमे राहुशुक्रौ च राजयोगोभिधीयते॥५०॥ सिंहे जीवो

लं० चं०
॥५॥

कन्यायां भार्गवो मिथुने शनिः॥ स्वर्दे च हिबुके भौमः स पुमा
न्नायको भवेत्॥५१॥ शनिश्च द्रौ च कन्यायां सिंहे जीवो घटे त
मः॥ मकरे च कुजस्तस्य जातो विश्वस्य पालकः॥५२॥ शुक्रो जी
वो रविर्भौमि चापे मकर कुंभयोः॥ मीने च वत्सरः विंशे जातस्य
सर्व कर्मकृत॥५३॥ केंद्रे धने त्रिकोणेषु सौम्यपाप ग्रहस्थितौ
चतुः सागरयोगोयं राज्यदो धनदो भवेत्॥५४॥ कर्कलग्ने जीव
युक्तो लाभः चंद्र भार्गवि: मेषे भानौ वयो जातः स राज्या विश्वपा
लकः॥५५॥ कर्मस्थाने यदा [illegible] जीवो बुध शुक्रेस्तदा राष्ट्री॥
सर्वकार्माणि सिध्यन्ति राजमान्यो भवेन्नरः॥५६॥ षष्ठेऽष्टमे

राम
॥५॥
२॥

पंचमे च नवमे द्वादशे तथा ॥ सौम्य क्रूर ग्रहै र्योगो राजमान्यः सकाम
कः ॥ ५७ ॥ पंचमे च यदा षष्ठे चाष्टमे नवमे क्रमात् ॥ भौम राहु सिता
र्कास्यु र्जातकः कुल दीपकः ॥ ५८ ॥ लग्ने सौरि स्तथा चंद्र श्चाष्टमे
भार्गवो यदा ॥ जायते च तदा राजा मानी यवी रतः सदा ॥ ५९ ॥ मिथु
ने स्थो यदा राहुः सिंहस्थो भूमिनंदनः ॥ अत्र यातः पितु द्रव्य प्राप्नो
ति सकलान्नृपः ॥ ६० ॥ चापार्द्धे शनिना युक्तो यदि सूर्य्य प्रजायते ॥
लग्ने च सबला श्चन्द्रो मकरे च कुजो भवेत् ॥ ६१ ॥ अत्र योगे समुत्प
न्नो महाराजो भवे न्नरः ॥ दृष्ट दे वन सं[illegible] त्यस्य प्रताप श्वरो न्नृपा
६२ ॥ उच्चाभिलाषी सविता त्रिकोणस्थो यदा भवेत् ॥ अपि नीच
कुले जातो राज्यस्या द्धन क[illegible] परीतः ॥ ६३ ॥ एकादशे यदा सर्वे

लं० त्रं० ॥६॥

ग्रहाः स्यु दशमेपि वा॥ लग्न संस्थे सुखे वापि कारकाः परिकीर्त्तिताः ६४॥ उत्पन्नः कारके योगे नीचोपि न्टपतां व्रजेत् राजा वंशे समुत्प न्नो राजा तत्र न संशयः॥ ६५॥ लग्न नवांशपति तो वापि च क्रमेरा पति ता ग्रहाः एको वती समाख्याते महाराजो भवेन्नरः॥ ६६॥ धन स्थाने यदा शुक्रो दशमे च वृहस्पतिः॥ षष्ठे च सिंहिकापुत्रो राजा भ वति विक्रमी॥ ६७॥ चतुर्ग्रहाः एकगताः पापाः सोम्याः भवंतिहि॥ भ्रात ३ धी ५ धर्म ९ लग्नाश्रयै र राजयोगो भवो दयं॥ ६८॥ त्रिकोणे सप्तमे लग्ने भवति च यदा ग्रहाः॥ हस योगं विजानीयात्स्व वंशस्य च पालकः॥ ६९॥ सर्वै ग्रहै यदा चंद्रो विनासिंचु निरीक्ष्यते॥ षष्ठेव मे नेस्थितस्य च सदा वापि धराधिपः॥ ७०॥ षष्ठे ष्ट मे द्वादशे च क्षिती

रामु १८

राम ॥६॥

येच यदा ग्रहाः ॥ सिंहसनाख्यो योगोयं राजासिंहासने वसेत् ॥७१॥ लग्ने
शुक्रो सनौ नस्थः केन्द्रे नास्ति वृहस्पतिः ॥ दशमे गारको नास्ति सजातः
किं करिष्यति ॥७२॥ स्वक्षमस्थाः यदा क्रूरा सौम्या लग्ने स्थिताः ग्रहाः
ध्वजयोगो त्रयो जातः सपुमान्नायको भवेत् ॥७३॥ षष्ठस्थाने यदा
पापाः केन्द्रस्थाने शुभग्रहाः ॥ सर्वसिद्धिर्भवित्तस्य राजा मान्यो भवेन्नरः
७४॥ मेषलग्ने यदा भानुश्चतुर्थे च वृहस्पतिः ॥ दशमे च कुजे जा
तो विश्वस्याधिपतिर्भवेत् ॥७५॥ लग्ने शौरिस्तथा चंद्रे स्त्रिकोणे जी
व भास्करो ॥ कर्मस्थाने भवेद्रौमो राजयोगो निधीयते ॥७६॥ केन्द्रे
स्वोच्चस्थिते सौम्ये राज्यलक्ष्मीपतिर्भवेत् ॥ केन्द्रे पापस्वोच्चसंस्थे

ल०चं०
७

राजास्या उदिते ग्रहे ॥ ७७॥ बली सौम्यः ग्रहो लग्ने केन्द्र स्थो यदि वीक्ष
ते॥ तदा निहंत्यरिष्टानि तमः सूर्य्यो यथा दृषे॥७८॥ चतुः केन्द्र गता
सौम्याः पापास्त्वद्वादशषष्टयोः॥ स राजा विश्व विख्यातो ध्वज छत्र वि
भूषितः॥७९॥ लग्नाच्च पंचमे स्थाने यदा सूर्य्य बृहस्पतिः॥ तदा वि
द्या धनैः पूर्णो जायते जात कोत्तमः॥८०॥ एकोपि यदि केन्द्र स्थाः श्री
को जीवो थवा बुधः॥ जायते चतदा बालो धनाढ्यो वेद पारगः॥
८१॥ क्रियि सौख्ये [illegible] नीचाः व्यय भावे थवा पुनः॥ भवे पुत्रं ग्रि
नः षष्टे निर्धनी चैव भिक्षुकः॥८२॥ वंध्या नारी पुमान्वंध्यो मृत्यो
स्थमातु भावजो॥ मृत्युस्थाः स्यु र्यदा पापा मृत्यु दातुं गता सदा॥८३॥

राम
७

ल०

अग्रे जातं रविर्हन्यात्पृष्ठे जातं शनैश्चरः॥ जातं जातं कुजो हन्यान्ना
ह नान्यसुपाचरेत्॥२४॥ चतुःकेंद्रगताः सौम्याः पापा द्वादशषष्ठ
गाः॥ भवेत्स राजा विख्यातो लक्ष्मीयुक्तो विभूषितः॥२५॥ लग्ना
त्पंचमस्थाने यदा सूर्य्यबृहस्पती॥ तदा विद्याधनैः पूर्णो जाय
ते जातकोत्तमः॥२६॥ नीचस्थिता जन्मनि ये ग्रहास्यात्तद्राशिना
थश्च तदुच्चनाथः॥ भवेत्त्रिकोणे यदि केंद्रवर्ती राजा भवेत्पा
र्थिवचक्रवर्ती॥२७॥ षष्ठे क्रूरे नरो यातः शत्रुपक्षविमर्दकः॥
षष्ठे सौम्ये सदा रोगी षष्ठे चंद्रश्च मृत्युदः॥२८॥ लग्नात्तृतीयभ
वने यदि सोमसुतो भवेत्॥ द्वौ पुत्रौ कन्यकास्तिस्रो जायंते नात्र संश
यः॥२९॥ लग्नात्तृतीयभवने बली वाचस्पतिर्यदा॥ पंचपुत्रा

॥श्री॥

१०चं०

॥ ८ ॥

स्तदा तस्य जायते मानवस्य च ॥ ८० ॥ लग्नात्तृतीयभवने शनिश्चंद्रय
दा स्थितौ ॥ श्यामवर्णास्तदा बालो भ्रातृहीनश्च जायते ॥ ८१ ॥ लग्ना
त्तृतीय भवने बली शुक्रो यदा भवेत् ॥ कन्याद्वयं त्रयः पुत्रा जायंते त
स्य निश्चितं ॥ ८२ ॥ लग्नात्तृतीय भवने राहुयुक्तो यदा शशी ॥ भ्रा
तृहीनो भवेद्बालो लक्ष्मीवानपि जायते ॥ ८३ ॥ लग्नात्तृतीय भव
ने पंचमे वा धरासुताः ॥ म्रियते पुत्रदुःखेन नारी वा पुरुषोपि वा ॥
८४ ॥ लग्नात्सप्तमगेस्थोपि यदि शुक्रो वसी भवेत् ॥ कन्याद्वयं
त्रयः पुत्रा धनवानपि जायते ॥ ८५ ॥ सिंहे लग्ने यदा शुक्रः श
निर्वापि व्ययस्थितः ॥ तत्र जातस्य बालस्य नेत्रनाशो यदा भवेत्
८६ ॥ सूर्येष्टमे रिपौ चंद्रे धने भौमे व्यये शनि ॥ राहु दोषेण

राम

॥ ८ ॥

नेत्राणां अंधतां जन्मवंत्य मी॥ ९७॥ सिंह लग्ने यदा शुक्रो शनि वीपिवक्री
वास्थित:॥ तत्र जातस्य बालस्य नेत्रनासे: प्रजायते॥ ९८॥ शुभे वर्गो
त्तमे जन्म वेषिता स्थाने च सद्गृहे॥ अशून्ये शुचके द्रपुकारकाख्य ग्र
हेषु च॥ ९९॥ सूर्ये केंद्र राजसेवी वैश्य वृत्तिर्निशाकरे॥ शास्त्र
वृत्ति कुजे शूरो बुधे चाध्यापको भवेत्॥ १००॥ स्वानुष्ठाने रतो नि
त्यं दिव्यबुद्धिर्नरो गुरौ॥ शुक्रे विद्यार्थ संपन्नो नीच सेवी शनै
श्चरे॥ १०१॥ इति राजयोगा:॥ केंद्र वसैाम्या यदि वीर्य भाज:
पापा: फलज्ञे च मनुष्य राशौ॥ राज्ञी भवेत्स्त्री पृथु कोश युक्ता वि
त्यं प्रसूता च सुपुत्रिराशि च॥ बुधो विलग्ने यदि तुंग संस्थो लाभ
स्थितो देव पुरोहितश्च॥ नरेन्द्र पत्नी वनिता प्रसंगी तदा प्रसि

स०चं०
१९॥

ष्टा भवतीह भूमौ ॥१०२॥ एकोपि जीवो स्ववर्गशुद्धः केन्द्रे यदा
केन्द्र निरीक्षितश्च । राज्ञी भवेत्स्त्री सधना सुपुत्रा रूपान्विता प
रानितंबविंबा ॥१०३॥ कर्कोदये सप्तमगोपतंगी जीवेन दृष्टेप
रिपूर्णदेहे । विद्याधरी चात्र भवेत्प्रधाना राज्ञी गतारिर्बहुपुत्र
पौत्रा ॥१०४॥ षड्वर्गशुद्धैस्त्रिभिरेव राज्ञी चतुर्भिरंशैश्च तथैक
पत्नी ॥ पंचादिभिर्देवविमानभाजी । त्रैलोक्यनाथपदमदात
दास्यात् ॥१०५॥ लाभस्थिताः शीतकरो भृगुश्च कलत्रगः सोम
सुतेन युक्तः ॥ जीवेन दृष्टा भवतीह राज्ञी ख्याता धरायां सक
लेसुता च ॥१०६॥ स्त्रीपुंसयोः फलं तुल्यं जातके किंतु सप्तमे ॥
सौभाग्यं [redacted] चंद्र लग्नाभ्यामष्टमाद्भर्तृनाशनं ॥१०७॥

राम
१९

इति श्रीराजयोग ॥ अथ शुभाशुभ योग निर्णयः ॥ कर्मस्थाने निजक्षे
त्रे भौमशुक्र बुधैर्युतः ॥ यदि राहु भवेत्तस्य क्षतो व्याधिः क्षतो क्षयः ॥
१०८ ॥ होरायां द्वादशे राशौ स्थितौ यदि दिवाकरः ॥ करोति दृष्टिरोका
णं वाम नेत्रे च चंद्रमा ॥ १०९ ॥ भौम क्षेत्रे यदा राहु जीवो जीव क्षेत्रे च
संस्थितः द्वादशे वत्सरे मृत्युर्बालकस्य न संशयः ॥ ११० ॥ धनस्थाने य
दा भौमः शनिश्चर समन्वितः ॥ सहजे च भवेद्राहु भ्राता तस्य न जी
जीवति ॥ १११ ॥ चतुर्थे च यदा राहुः षष्ठे चंद्रोष्टमेपि वा ॥ सद्य एव भ
वेन्मृत्युः शंकरो यदि रक्षति ॥ ११२ ॥ अष्टमस्थो निशानाथ केंद्र पाप
न संयुतः ॥ चतुर्थे च यदा राहु वर्षमेकं स जीवति ॥ ११३ ॥ पाताले वांब
रे पापो द्वादशो च यदा स्थितः ॥ पितरं मातरं हंति देशाद्देशांतरं व्रजेत् ॥ ११४ ॥

स॰ चं० ॥२०॥

पंचमस्थो निसानाथः त्रिकोणेच बृहस्पति ॥ दशमेच महीसूनुः परमायुः सजीवति ॥११५॥ धनस्थाने यदा क्रूर क्रूरग्रहसमन्वित ॥ न पश्यंति निज देवे मल्प पुत्र स्तदा भवेत् ॥११६॥ धनस्थाने यदा क्रूरः सहजे सप्तमे तथा ॥ पंचमे भवने जीवो नीच जात स्तदा भवेत् ॥११७॥ नवमे पंचमस्थाने चतुर्थे च यदा ग्रहाः ॥ आदौ जातः श्च नश्यति पश्चा जातश्च जीवति ॥११८॥ विवाहितया मन्यस्या मेकः पुत्रो भवेत्तदा ॥ विख्यातो भुवने त्यागी स दीर्घायुर्महामति ॥११९॥ लग्ने धने व्यये चैरो यदा मृत्युश्च जायते ॥ विषया मार्ग बंधो स्यात द्वादशोऽष्टमवासरे ॥१२०॥ षष्ठे च भवने भौमः सप्तमे सिंहिकासुतः ॥ अष्टमे च यदा शौरि भार्या तस्य न जीवति ॥१२१॥ तिथिप्रान्ते दिनान्ते च लग्नस्थान्ते तथैव च ॥ चर

राम ॥२०॥

राशौ यदा जातः सोन्य जातः शिशुर्भवेत् ॥२२२॥ स्वक्षेत्रस्थो यदा भौमः कर्म स्थाने निरीक्षते ॥ बुध सागलि संयुक्तः स्वस्य कान्ति लपदः ॥२२३॥ रिपुस्थाने यदा चंद्रो लग्न स्थाने शनैश्चरः ॥ कुजश्च सप्तम स्थाने पिता तस्य न जीवति ॥२२४॥ एकादशो यदा क्रूरः पंचमे [illegible] भार्गवो ॥ प्रथमं कन्यका जन्म पिता तस्य न जीवति ॥२२५॥ सहज स्थो यदा राहु र्दुर्न स्थाने वृहस्पतिः ॥ बुधे नवसप्त युक्तः स्वस्य बंधु क्षयं भवेत् ॥२२६॥ चापे सूर्य शनिः कुंभे मेषे भवति चंद्रमाः ॥ मकरे च यदा शुक्रो भुक्ते नैव पितुर्धनं ॥२२७॥ क्रूराश्च चतुर्षु केन्द्रेषु तथा क्रूरो धने पिवा ॥ दारिद्र योगं विजानीयात् स्ववंसस्य क्षयंकरः ॥२२८॥ लग्न स्थाने यदा जीवो धनस्थाने शनैश्चरः ॥ राहुश्च सहज स्थाने माता तस्य न जीवति ॥२२९॥ सप्तमे भवने भौमश्चाष्टमे भार्ग

राम
राम राम

वो यदा ॥ नवमे भवने सूर्य्ये स्वल्पायुस्तस्य जायते ॥१३०॥ राहुजीवौ रिपुक्षे
त्रे लग्ने वाथ चतुर्थके ॥ जयो विप्रा तदा वर्षे पुत्रस्तद्विनाशयेत ॥१३१॥
बालस्य [illegible] जन्मकाले च दृष्टमस्थः शनैश्चरः ॥ जातकश्च भवेत्कुष्ठी मासे
मृत्युर्न संशय ॥१३२॥ क्रूर दृष्टो जन्मलग्नात् [illegible] चाष्टमे बुधः ॥ चतु
र्वर्षैर्भवेन्मृत्युः [illegible]रो यदि रक्षति ॥१३३॥ अष्टमस्थो यदा भौम स्त्रिको
गो६ णो जीवको रविः ॥ सद्यो धूमे वजातः स्याद्धिद्वा जीवीच दुखिता ॥१३४
सिंहे भौमस्तुले शौरि कन्यायां च यदा सित ॥ मिथुने च यदा राहु जननी
तस्य नश्यति ॥१३५॥ लग्ने क्रूरः स्वभवने क्रूरपालिगो यदा ॥ दशमे भवने
क्रूर कष्टं जीवति बालकः ॥१३६॥ अष्टमे च निशानाथे केंद्रे क्रूरो यदा
भवेत् ॥ चतुर्थे च यदा राहु वर्षमेकं स जीवति ॥१३७॥ शुभग्रहावलो

लोकैश्चयादि जीवतिघातकाः॥ सचदुष्टस्वभावश्च क्रूरंकर्म करोतिच
१३८॥ लग्नेचंद्रो धने शुक्रो व्ययेचबुध भास्करौ॥ राहुश्चपंचमेवार्त
सभवेद्दुष्टबंधकृत्॥१३९॥ सप्तमे भवने भानु र्मध्यस्थो भूमिनंदनः
राहुश्चांतेश्च तस्यैव पिता कष्टे न जीवति॥१४०॥ स्मरेव्ययेच सहजेम
ध्येक्रूरा यदा ग्रहाः॥ तदा जातस्यबालस्य शरीरे कंपमादिशेत्॥
१४१॥ कन्यायांच यदाराहुः शुक्र भौमशशिसंयुता तत्र जातस्य
जायेत कुबेरादधिकं धनं॥१४२॥ धने राहुर्बुधः शुक्रः सौरि सूर्योय
दास्थिताः॥ तस्य मातु र्भवेन्मृत्यु मृते पितरि जायते॥१४३॥ रविराहोः

शौरि सौम्य जीवाल मेच पंचमे श्रत्र योगे जगो जातजातमात्रं सन
श्यति॥२४४॥ जीवार्क राहु भौमाश्च चत्वारः क्रूरवर्गगाः॥ सप्तमेव
गृहे शुक्रो देहे कष्टं सदा भवेत्॥२४५॥ क्रूरलग्ने भवेज्जातस्तत्स्वा
मी क्रूरवेष्टितः॥ श्वासवातौ भवेत्तस्य शरीरे कष्टमादिशेत्॥२४६॥
गुरुस्थाने यदा भौमो राहु शौरि समन्वितः॥ नृपपीडा भवेत्तस्य
श्वासने नैव तिष्ठति॥२४७॥ सहजे सहजा भौमो लग्ने पुत्रे धने पि
वा॥ जायते च सदा बालो यदि जातो न जीवति॥२४८॥ कन्यायां
मिथुने राहुः केंद्रे षष्ठे व्यये भवेत् त्रिकोणे च यदा जातो दाता भो

त्का निरामयः॥१४९॥ चतुर्थे राहु सौरार्कौ षष्ठे चंद्रे बुधः कुजः भार्गव
पुत्रा त्रयो जातः स गर्हस्य क्षयंकरः॥१५०॥ एकः पापो भूमःस्थो
पि शत्रुक्षेत्रे यदा भवेत्॥ पापेन वि क्षि तो वर्षान्मारयेत्येव वाल
वालकं॥१५१॥ भौम भास्कर मंदाश्च शत्रु क्षेत्रेषु मे यदा॥ भूमे
न रक्षितोप्येवं वर्षमात्रं नजीवति॥१५२॥ वक्रे भानि भौम गेहे
केंद्रे षष्ठाष्टमे पिवा॥ कुजेन वालिना दृष्टो हंति वर्षद्वयं शिशुः
१५३॥ राहुर्विवे त्रिभिर्दृष्टे केतु दृष्टेवनुष्टये दृष्टे च गुरु शुक्राभ्यां
दीर्घ कालं सजीवति॥१५४॥ चंद्रेन मंगलो युक्तो जन्म काले यदा
भवेत् तस्यजातस्य मेरुस्तु लक्ष्मी नैव विरं चति॥१५५॥ षष्ठा

राम
॥२२॥

षष्ठगताश्चन्द्रः सद्यो मरणाय पापसंदृष्टः ॥ अष्टाभिः शुभदृष्टेन वर्षैर्मिश्रे त्रिदैर्धनं ॥१५६॥ शुक्लपक्षे निशायां च कृष्णे जायत वासरे ॥ षष्ठाष्टमगत श्चन्द्रो नाशिशुं हंति वै ध्रुवं ॥१५७॥ शनिराहुकुजैर्युक्तः सप्तमे नवमे शशी सप्तमे दिवसे हंति मासे वा सप्तमे शिशुः ॥१५८॥ पुत्रे कलत्रे लग्ने च व्यये पाप युतः शशी ॥ शिशुं हंति न दृष्टश्चेद् सर्वैः शुभग्रहैः ॥१५९॥ न पश्य ति शशी लग्नं मध्ये वा शुक्रसौम्ययोः ॥ जातं परोक्ष पन्मासैः भौमे सेवा यमे तनौ ॥१६०॥ लग्नस्थश्च यदा भानुः पंचमस्थो निशाकरः ॥ अष्टमस्थो यदा पापस्तदा जातो न जीवति ॥१६१॥ चन्द्रः पापग्रहैर्युक्तो चन्द्रो वा पा पमध्यगः ॥ चन्द्रात्सप्तमगः पापस्तदा पितृवधो वधो भवेत् ॥१६२॥ लग्नः पापेन संयुक्तः लग्ने च पापमध्यगः ॥ लग्नात्सप्तमगः पापस्त स्य चात्मवधो भवेत् ॥१६३॥ सूर्य्यः पापेन संयुक्तः सूर्यो वा पापमध्यगः

सूर्य्यात्सप्तम गः पाप स्तदापितृ वधो भवेत् ॥२६४॥ भ्रातृक्षेत्रे यदा याते लग्ने
शोऽस्तं गतो भवेत् ॥ शुक्र माचि तदा याते सप्त वर्षाणि जीवति ॥२६५॥
षष्ठ मेच यदा सौरी जन्म स्थानेच चंद्रमाः ॥ मन्दाग्न्युदर रोगांश्च गात्र हो
न स्य जायते ॥२६६॥ शनिक्षेत्रे यदा भानु भानुक्षेत्रे यदा शनिः ॥ द्वाद
शे वत्सरे मृत्यु तस्य जातस्य जायते ॥२६७॥ बुध सौम्य यदा लग्ने षष्ठे स्थाने
च तिष्ठतः ॥ तस्करो घोर कर्माच हस्त पादौ विनस्यति ॥२६८॥ षष्ठेष्व
मेच मूलौचि शत्रुक्षेत्रे यदा बुधः ॥ चतुर्वर्षे भवेन्मृत्यु र्बालक स्यन सं
शयः ॥२६९॥ षष्ठ मस्थो यदा राहुः केन्द्र स्थाने च चन्द्रमा ॥ सद्य एव भ
वेन्मृत्यु र्बाल क स्यन संशयः ॥२६८॥ सप्तमे नवमे राहुः शत्रुक्षेत्रे य
दा भवेत् प्राप्ते च षोड़से वर्षे तस्य मृत्युर्न संसयः ॥२७०॥ द्वादशस्थो

ज्यो० चं०
॥२४॥

यदा चंद्रो पापस्य दष्टमे ग्रहे एक मासेन जकेन्मत्यु तस्य वालस्य निश्चितं ॥१९१॥
यन्मस्थाने यदा राहुः षष्ट स्थाने च चंद्रमा ॥ अपस्मारी तदा वालो जायते ना
त्रसंशयः ॥१९२॥ भार्गवेन युतश्चंद्रो षष्टाष्टम गतो भवेत ॥ मंदाग्न्यु
दर रोगी च हीना गोपिव वालकः ॥१९३॥ षष्टाष्टमे भवे चंद्रो बुध
युक्त मव तिष्टति विष दोषेण वालस्य तदा मृत्युश्च जायते ॥१९४॥
भानुना संयुतः श्चंद्रो षष्टाम ग्रहे यदा ॥ राज दोषेण मृत्युर्वा सिंह
दोषेण वा भवेत् ॥१९५॥ एकोपि यदि मर्तौस्या जन्म काले [illegible]
दिवाकरः ॥ स्थान हीनो भवेद्वालो शोक संताप पीडितः ॥१९६॥ द
श मस्थो यदा भौमः शत्रु क्षेत्रे स्थितस्तदा ॥ म्रयते तस्य वालस्य पि
ताश्चीघ्रं न संसयः ॥१९७॥ लग्ने षष्टमय दा राहुश्च चंद्रोपि यदि दृश्यते

राम
२९

स्याहे जायते तस्या बालानां मरणं ध्रुवं ॥१७८॥ लग्ने जीवो धने मंदो रवि
भौमबुधस्तदा ॥ विवाहस्य मयेत्तस्य बालस्यम्रियते पिता ॥१७९॥ स्थानेश्च
रनु लाकुंभमकरे यदिवाभवेत ॥ लग्ने षष्ठे तृतीये वा तदा रिष्टं न जाय
ते ॥१८०॥ लग्ने मीने जीवशुक्रौ मेषे कौ मकरे कुज ॥ दासवेसोपि
जातोसौ राजा छत्रधरो भवेत् ॥१८१॥ लग्नाच्च नवमे सूर्ये सप्तमेपु
त्रे तथाष्टमे एकादशे भागविच मासमेकं सजीवति ॥१८२॥ धने
गुरु सिंहिकेयो भौमः शुक्रश्च सप्तमे ॥ अष्टमे रवि चंद्रौ च षष्ठे
स्याद्दोवने द्विजः ॥१८३॥ नवमे दशमे चंद्रः सप्तमे च यदा स्थितः ॥
पापो पाताल संस्थेच वंशच्छेदकरो नरः ॥१८४॥ भ्रातृस्थाने जदा
जीवो लाभस्थाने यदा शशी ॥ सतो को ग्रहमध्यस्थो सजातः कुर

दीपकः॥१८५॥ एकः पापो यदा लग्ने पापश्चैको रसातले॥ जायते च बहु
नाशाय सजातः कुलदीपकः॥१८६॥ सिंहे लग्ने यदा भौमः पंचमे च
निशाकरः॥ व्ययस्थाने यदा राहु सजातः कुलदीपकः॥१८७॥ लग्ने
वा सप्तमे भौमः पंचमे च दिवाकरः॥ जीवेद्वर्षत्रय मध्ये पि विष्णुना
तः सुन संशयः॥१८८॥ भौमक्षेत्रे यदा जातो मृतौ क्रूरग्रहो भवेत
वर्ष मध्ये भवेन्मृत्यु र्बालकस्य न संशयः॥१८९॥ क्षीणचन्द्रो द्वाद
शस्थो दुःखदः पापवीक्षितः॥ करोति विपुलं नाशं धनमस्योय
दारानि॥१९०॥ द्वादशे च यदा चंद्रः षष्ठे पाप ग्रहो भवेत॥ स्वल्पा
युश्च यदा रोगी जायते जातको ध्रुवं॥१९१॥ शनिक्षेत्रे यदा भानुः
भानुक्षेत्रे शनैश्चरः॥ विंशती वत्सरो मृत्युः बालकस्य न संशयः॥१९२॥ एम

दशमेच भवे द्रष्ट :पिद मात्रोप्रपीड़कः द्वादशोवत्सरे तस्य जातस्य
मरणं ध्रुवं॥१८३॥ रिपुस्थाने यदापापो व्ययस्थानेच चंद्रमा
चतुर्थे भंग सेतातस्य माता तस्य नजीवति ॥१८४॥ चतुर्थे मातृहा
पापो दशमे पितृहा भवेत॥ सप्तमे भवनेपाप पितृ मात्रोविना
सयेत॥१८५॥ द्वादशोरिपु भावेच यदा क्रूरो व्यय स्थिताः तदा
मातुर्भयं विद्या चतुर्थे दशमे पितुः॥१८६॥ उच्चोवा यदिवा नी
चः सप्तमस्थो यदा रवि तदायातो निहं व्याशु नान्तरं नात्र संशयः
१८७॥ नागार गोर्ह सिद्धु २४ जाती २२५५ हमा १ द्वि ४ नेत्र
२ नषः २० घटाति: १२ हमाशिव २१ दिक् १० दशाद्वे योसुल्याद्दे

श्च निधौ व्ययस्थ: ॥ १९८ ॥ लग्नेशा निर्यदा भौमो राहु: सूर्यश्च सं
स्थित: ॥ संतापो रक्त दोषस्य सर्वसौम्येष्व रोगिता ॥ १९९ ॥ के
न्द्रे शुभे यदै कोपि क्ली विश्व प्रकाशक: ॥ सर्व दोषा: क्षयं जाति
दीर्घायुश्च भवेन्नर: ॥ २०० ॥ स्वके केंद्रे यदा चेंद्रो मित्रांशे गुरु
वीक्षित: ॥ वित्तवान ज्ञान संपन्नो जायते च तदा नर: ॥ २०१ ॥ इति
ग्रहाशुभाशुभ योग ॥ विपद: प्रथमे मासे द्वा त्रिंशे च त्रयोदशे
वर्षेपि च तत: सूर्य्ये जातो जीवति वष्टक: ॥ २०२ ॥ एकादशे
ष्टमे मासे चन्द्रे पीड़ा च षोड़से ॥ सप्तविंसति से वर्षे चतुर्युक्तो
सितौ मृति: ॥ २०३ ॥ द्वात्रिंशे च तृतीये च वर्षे पीड़ा च मंगले
चतु: सप्तति वर्षे रा सदा रोगी स जीवति ॥ २०४ ॥ बुधवारेष्टमे

मासे पीड़ा वर्षे तथाष्टमे ॥ पूर्णे चतुःषष्टिवर्षे ततो मृत्युर्भविष्य
ति ॥२०५॥ गुरौ च सप्तमे मासे षोडशे च त्रयोदशे पीड़ा तथाश्च चतुर्यु
क्ते शत वर्षाणि जीवति ॥२०६॥ शुक्रवारे च जातस्य देहे रोगविवर्जि
तः षष्टिवर्षे च संपूर्णे म्रियते मानवो ध्रुवं ॥२०७॥ शनौ प्रथममासे
च पीडा षट्दशवत्सरे ॥ दृढदेहस्तदा जातः शत वर्षाणि जीवति ॥२०८॥
इति वारफलम् ॥ मिष्टान्नभोगी मानी च क्रोधी चरति लम्पटः पित्ताधिको
रवेवारे धनकामी भवेन्नरः ॥२०९॥ इति ग्रहाशुभाशुभ विचार ॥ भो
गी कामी प्रशस्तवेत्ता गुणी मानी जितेन्द्रियः विद्याधिकः प्रीतियुक्तो जा
यते सोमवासरे ॥२१०॥ मूर्खप्रियो धनी क्रूर श्रुतिस्मृति विनिंदकः
स्त्रनास्तिवेदहीनो भौमे भोगी भवेन्नरः ॥२११॥ वेदशास्त्र क्रियायुक्तो
दयालुश्च चतुर श्रुतः भय प्राणको योग युक्तो जायते बुध वासरे ॥२१२॥

वेदवि ज्ञो ग्नि होत्री च पुत्रपौत्र धनान्वितः ॥ व जान्विताः पूर्ण वेता गुरु

वारे भवेन्नरः ॥ २१ ॥ अर्थी भोगी धनी शूरः कृपालुर्बहु सेवका

दैव ज्ञोपि स्तुति ज्ञोपि जातः शुक्रदिने भवेत् ॥ २२ ॥ नीचाशक्तः

कृत घ्नश्च कुटिलो बंधु पीड़कः कृतकार्य्य हरो रोगी जायते शनिवा

सरे ॥ २३ ॥ लग्नादुपचयस्थान स्थिता वार ग्रहे सति उक्तं फलं भवे

दे वं विपरीत मथो न्यता ॥ २४ ॥ इतिवारफलम ॥ अथ मेषा

दिराशिस्थ चंद्रफलं ॥ नेत्ररोमलः सदा रोगी धर्मार्थकृत निश्चयः व

पुजंघः कृतज्ञश्च विक्रांतो राजपूजितः ॥ २५ ॥ कामिनी हृदयानं

दो दाता सी तोजलादपि प्रचंड कर्मा मदश्च मेषराशौ भवेन्नरः

२६ ॥ भोगी दाता शुचि र्दक्षो महामल्लो महाबलः रागी विलासी

तेजस्वी सुमित्र स्ववंशे भवेत् ॥२१८॥ मित्र वाक्ये द्रष्टि लोलो दया
लुर्मैथुनप्रियः गंधर्ववित्कंठरोगी कीर्तिभागी धनी गुनी ॥२२०॥
गौरो दीर्घः पटुर्वक्ता मेधावी च दृढव्रतः ॥ समर्थो ज्ञापवादी च जाय
ते मिथुने नरः ॥२२१॥ कार्य्यकारी धनी शूरो मिष्टाच गुरुवत्सलः ॥ शि
रो रोगी महाबुद्धिः कृशांगः कृतवित्तमः ॥२२२॥ प्रवासशीलकोपा
घोऽबलो दुःखी सुमित्रकः ॥ ग्रहना सक्तो गृहे वक्रः कर्कराशौ भवेन्न
रः ॥२२३॥ क्षमायुतः स्वप्रयुक्तो मध्यमास धनप्रियः ॥ सदा च देव
धर्मरता प्रति भीत सुमित्रकः ॥२२४॥ विनयी शीघ्रकोपश्च जननी
जनवल्लभः ॥ व्यसनी प्रकटो लोके सिंहराशौ भवेन्नरः ॥२२५॥ वि
लासी स्वजनाह्लादी सुभगो धर्मपूरितः ॥ दाता दक्षः कविर्वृद्धो वेद

हे० वं०
॥२८॥

वेद मार्ग परायणः ॥२२६॥ सर्व लोक प्रियो नाट्यम गंधर्व व्यसने रतः ॥ प्र
वास सीलस्त्री दुःखी कन्या जातो भवेन्नरः ॥२२७॥ अप्रस्थान रोग रोग दुः
खी पटु भागी रूपान्वितः ॥ चंचला ह्रस्व लक्ष्मी को ग्रह मध्योति विक्रमः
२२८॥ वाणिज्य दक्षो देवानां पूजको मित्र वत्सलः ॥ प्रवासी सुहृदा मि
त्र सुखे जातो भवे न्नरः ॥२२८॥ बाल प्रवासी क्रूरात्मा शूरः पिंगल लो
चनः ॥ पर दार रतो मानी निष्ठुरः स्वजने जने ॥२३०॥ सहसा प्रिय दुर्मी को
मरः जनन्यामपि दुष्ट धी धूर्त श्चौर पल्ला रंभोव्य मिव के जायते नरः
२३१॥ शूरः सत्याधिवा युक्तः सात्विको जन नंदनः ॥ सिल्प विज्ञान संप
न्नो ललित ज्ञाहार भाविक ॥२३२॥ मानी चर्यैव संपन्नो ललिता व्य
र भाषकः ॥ तेजस्वी स्थूल देह स्व धनु जतिः कुलांतकः ॥२३३॥ राम
॥२९॥

कुज नेष्ये वसस्त्रीराणां पंक्तिः पारदारिकः॥ गीतज्ञोलालसी बुधः पुत्रा

द्यो मातृ वत्सलः॥२२४॥ धने त्यागी सुन्चत्यश्च स्त्यालु र्वन्धु बांधवः

परिधिंतितसौख्यश्च मकरे जायते नर॥२२५॥ दातालसः कृतज्ञश्च

गजवाजि धनेश्वरः॥ शुभदृष्टिः सदासौम्यो मानविद्यावतो ध्रमः

२२६॥ पुन्याद्यः स्नेह हीनश्च धनी भोगी सभान्तिकः॥ शालूरकु

क्षि निर्मित्तिः कुंभेच जायते नर॥२२७॥ गंभीर चेष्टितः शूरः पटुर्वा

क्यो नरोत्तमः कोपनः कृपणो ज्ञानी गुणाश्रेष्ठः कुलप्रियः॥२२८

नितसेवी शीघ्रगामी गंधर्वकुलः शुभः॥ मीनराशौ समुत्पन्नो जाय

ते बंधुवत्सलः॥२२९॥ मेषे हीनो वृषे मानी नाना बुद्धिश्च मन्मथे

च०
॥२९॥

क्रूर कर्क धातिः सिंहे कन्यायां वहु मापिता ॥२४०॥ तुले शास्त्री मसी
वालो चापे पापाया: शाया नर ॥ मुख रोग मकरे कुंभे चतुरः स्थिर धी
मष्षे ॥ २४१ ॥ इति जन्म राशि फलम् ॥ मेष लग्ने समुत्पनः खंडो मा
नी सुधीः शुभः ॥ क्रोधी स्वजन हं ताच विक्रमी पर वत्सल ॥ २४२ ॥
वृष लग्ने भवोल्लोको गुरु भक्तः प्रियंवधः गुणी कृती धनी लुब्धः
शूरः सर्व जन प्रियः ॥ २४३ ॥ मिथुनोदय संजातो मानी स्वजन वत्सल
त्यागी भोगी धनी कामी दीर्घसूत्रो रिमर्दकः ॥ २४४ ॥ कर्क लग्ने स
मुत्पन्नो भोगी धर्म जन प्रियः मिष्टान्न पान भोगी च शुभगः स्व
जन प्रियः ॥ २४५ ॥ सिंह लग्ने दये जातो भोगी शत्रु विमर्दकः ॥

राम
॥२९॥

स्वल्पो दूरोल्पपुत्रश्च सोत्साही रणविक्रमः ॥२४६॥ कन्यालग्नन
वोबालो नानाशास्त्रविशारदः ॥ सौभाग्य गुण संपन्नो सुन्दरः
सुरते प्रियः ॥२४७॥ तुलालग्ने द्वयो जातः सुधीः सत्कर्म जीविकः
विद्वान् सर्वकलाभिज्ञो धनाढ्यो जनपूजितः ॥२४८॥ वृश्चिको
स्य संजातः सौर्यवान् अति दुष्टधी ॥ विज्ञान ज्ञान संपन्नः सुखीच
विग्रही सुधीः ॥२४९॥ धनुलग्ने द्वयो जातो नीतिमान् धर्मवान्
सुधी ॥ कुलमध्ये प्रधानश्च प्राज्ञः सर्वस्य पोषणः ॥२५०॥ म
करो दयसंजातो नीचकर्मा बहुप्रजाः ॥ लुब्धः स्वल्पबलसो दीनः
स्वकार्येषु कृतोद्यमः ॥२५१॥ कुम्भलग्नो द्वयो जातो वंसचिन्तोति

सौहृदः पर दार रतो नित्यं दु काये महा सुखी ॥२५२॥ मीनसमे
भवेद्वासो रक्तकों धन पूरितः ॥ अल्पकामी रतोश्च दीर्घकालवि
चिंतकः ॥२५३॥ इति जन्म लग्नफल समा॥ क्रूर संगी धनै हीनः कुलसं
तापकारकः ॥ व्यसनासक्त चित्तश्च प्रति पन्नियवो नरः ॥२५४॥ परदा
र रतो नित्यं सत्यसौख्य विवर्जितः ॥ तस्कर स्नेह हीनश्च द्वितीया सं भवो
नरः ॥२५५॥ अचेतनो अति विकलो निर द्रव्यो वरवरः सदा ॥ पर द्रव्य र
तो नित्यं तृतीया यो भवेन्नरः ॥२५६॥ महा भोगी च दाता च मित्र स्नेह
विवर्जितः ॥ धनसंतान संयुक्तः चतुर्थी यदि जायते ॥२५७॥ व्यव
हारी गुणग्राही पितृ मातृश्च रक्षकः ॥ दाता भोक्ता तत्प्रीतः पंचमी

संभवेन्नरः ॥२५८॥ नानादेशाभिगामी च सदा कलहकारकः ॥ नित्यं जठ
रदोषी च वष्टी जातो भवेन्नरः ॥२५९॥ स्वरूपतोषी च सं[redacted]नो तेजस्वी
सौभाग्य गुणसुंदरः ॥ पुत्रवान धनसंपन्नः सप्तम्यां जायते नरः ॥२६०
धर्मिष्ट सत्यवादी च दाता भोक्ता च वत्सलः ॥ गुणान्तः सर्वकार्यज्ञः चा
ष्टमी संभवो नरः ॥२६१॥ देवताराधकः पुत्री धनी स्त्री मग्न मान
सः ॥ शास्त्राभ्यासे रतो नित्यं नवम्यां यदि जायते ॥२६२॥ दशम्यां धर्म
धर्मज्ञो देवसेवी च पावकः गुणी धनी वेद विज्ञो बंधुविप्र प्रियो जनः
२६३॥ एकादश्यां नरेन्द्रस्य गेहगामी शुचि भवेत ॥ धर्मज्ञस्त्र विवेकी
च गुरुशुश्रूषको गुणी ॥२६४॥ चपलश्चंचल ज्ञानः सदा लोलः स्वरूपकः

१० बं०
॥२१॥

ऐश्वर्यमाप्नोत्यसौ सप्तम्यां च पूर्णिमायाम् जातको भवेत् ॥२६५॥ महासिद्धो महाप्राज्ञः श्या
श्च न्यासी जितेन्द्रियः परकार्य रतो नित्यं त्रयोदश्यां यदा भवेत् ॥२६६॥
धनकोषो धर्मशीलश्च शूरः सद्व्याख्यानपासकः ॥ राजमान्यो यशः प्रवीणश्च च
तुर्दश्यां यदा भवेत् ॥२६७॥ स्त्रीयुक्तो मतियुक्तश्च महा भोजनलालसः
उज्ज्वलः परदारेषु रतश्च पूर्णिमा भव ॥२६८॥ स्थिरारंभः परद्वेषी वक्री म
र्षः परा क्रमः गरु मंत्री च संज्ञानश्च अमावस्यां भवेज्जनः ॥२६९॥ इति
जन्मतिथि फलम् ॥ नन्दा तिथौ नरो जातो महामानी च कोविदः ॥ देवताभ
क्तिनिष्ठश्च ज्ञानी च प्रियवत्सलः ॥२७०॥ भद्रा तिथौ बंधुमान्यो राजसेवी
धनान्वितः ॥ संसार भय भीतश्च परमार्थमतिर्नरः ॥२७१॥ जया तिथौ राज
पूज्यः पुत्रपौत्रादि संयुतः शूरः शान्तश्च दीर्घायुर्महाविज्ञश्च जायते ॥२७२

राम
॥२१॥

रिक्तातिथियो वित्तहीनः प्रमादी गुरुनिंदकः ॥ शास्त्रज्ञ मतहंता च कामुकश्च
नरो भवेत् ॥२९३॥ पूर्णातिथौ धनैः पूर्णो वेद शास्त्रार्थ तत्ववित् ॥ सत्यवा
दी शुद्धचेता जातो भवति मानवः ॥२९४॥ इति नंदादि पंचतिथि साम्ना
न्यफलम् ॥ विष्कुंभजातो मनुजो रूपवान्भाग्यवान्भवेत् ॥ नानालंका
रसंपूर्णो महाबुद्धिविशारदः ॥२९५॥ प्रीतियोगे समुत्पन्नो योषितां वल्ल
भो भवेत् ॥ तत्वज्ञश्च महोत्साही स्वार्थे नित्यं कृतोद्यमः ॥२९६॥ आयुष्मा
न्नाम योगे च जातो मानी धनी कवीः ॥ दीर्घायुः सत्वसंपन्नो युद्धे चाप्य
पराजितः ॥२९७॥ सौभाग्येयः समुत्पन्नो राजो मंत्री स जायते निपुणः स
र्वकार्येषु वनितानां च वल्लभः ॥२९८॥ शोभने शोभनो बालो बहुपुत्र

सं० चं०
११५०

कत त्रवान॥ अतर: सर्व कार्येषु युद्धभूमौ सदा सुकः॥२७९॥ अतिगंडेच
यो जातो मातृ हंता भवेच्चसः गंडांतेषु च जातस्तु कुल हंता प्रकीर्तिताः
२८०॥ सुकर्मा नामयोगेच सुकर्मा जायते नरः सर्वप्रीतः सुखी लभ्यव
रागी भोगी गुणाधिकः॥२८१॥ धृतिमां धृतियोगेच कीर्तिपुष्टिध
नान्विताः भाग्यवान् मातृ सुख संपन्नो विद्यावान्गुणवान्भवेत्॥२८२॥
शूलेशूलव्यथा युक्तो धार्मिकः शास्त्र पारगः॥ विद्यार्थे कुशलो पन्ना जायतेम
नुजः सदा॥२८३॥ गंडेगंडव्यथायुक्तो बहुक्लेशो महाशिराः॥ ह्रस्वकायो म
हाशूलो बहुभोगी दृढव्रतः॥२८४॥ वृद्धियोगे सुरूपश्च बहुपुत्रकलत्रवा
न्॥ धनवानपि भोक्ताच सत्ववानपि जायते॥२८५॥ ध्रुवयोगेचदी

राम
१२२

धातु: सर्वेषां प्रियदर्शनि: ॥ स्थिरकर्मति शान्त श्च ध्रुव वृद्धिश्च जायते ॥२२६
व्याघातयोगे यातश्च सर्वज्ञ: सर्वपूजित: ॥ सर्वकर्मकरो लोको व्याघात: स
र्वकर्मसु ॥२२७॥ हर्षणो जायते लोको महाभाग्यो नृपप्रिय: ॥ हर्षासद
धनैर्युक्तो विद्या शास्त्र विशारद: ॥२२८॥ वज्र योगे च वज्र मुष्टि सर्वेवि
द्याविशारद: धन धान्य समायुक्तो मनोज्ञो वज्र विक्रम: ॥ २२९॥ सि
द्धि योगे समुत्पन्न: सर्व सिद्धि युतो भवेत् दाता भोक्ता सुखी कान्त:
शोको रागी च मानव: २३०॥ व्यती पाते च संजातो महकष्टेन जी
वति जीवय द्भाग्य योगेन संभवे दुत्तमो नरा: २३१। वरीयान्नाम
योगे च वरिष्ठो जायते नर: शिल्प काव्य कथाभिज्ञो गीत नृत्यादि को
विद ॥२३२॥ परिघे च नरो जात: स्वकुलनीति कारक: शास्त्रज्ञो

सुकवि वर्वाग्मी दाता भोक्ता प्रियंवदः ॥ २९३ ॥ शिव योगे नरो यातः
सर्व कल्याण भाजनः ॥ महादेव समालोको महाबुद्धि वरप्रदः ॥ २९४ ॥
सिद्धि योगे सिद्धिदाता मंत्र सिद्धिप्रवर्त्तकः ॥ दिव्य नारी समेतश्च सर्व सु
खं युतो भवेत् ॥ २९५ ॥ सिद्ध्ये मानसिकासिद्धः व्ययशेषश्च शाषा गम
दीर्घभ्रूवः प्रवृत्तिश्च जायते सर्व सम्मतः ॥ २९६ ॥ शुभे शुभ मते युक्तो
धनवानापि जायते विज्ञान शास्त्र संपन्नो दाता ब्राह्मण पूजकः ॥ २९७ ॥
शुक्ले सर्वकला युक्तो सर्वार्थि ज्ञानवान्भवेत् कचित्प्रतापी सश्च धनी
सर्वजनप्रियः ॥ २९८ ॥ ब्रह्म योगे महा विद्वान वेद शास्त्र परायणः ब्र
ह्मज्ञानरतो नित्यं सर्व कार्येषु कोविदः ॥ २९९ ॥ ऐन्द्रे भूप कुले जातो
राजा भवति विश्रुतः अल्पायुश्च सुखी भोगी गुणवान्नपि जायते
३०० ॥ वैधृते जायमानस्तु निरुत्साही बुभुक्षितः कुर्वाणोपि जनै प्रीति

प्रयात्या प्रियतां नरः ॥१॥ इति जन्मयोगफलम् विचार ॥ वालवाख्ये
नरो जातस्तीर्थ देवादि सेवकः शुभ कर्मा च मांड्गः सं स्थिर कर्मश्च जायते
२॥ ववाख्ये करणे जातो मानी धर्म रतः सदा ॥ विद्यार्थ सौख्य संपन्नो रा
जमान्यश्च जायते ॥३॥ कौलवाख्येतु जातस्य प्रीति सर्व सह ॥ संगतिर्मित्र
वर्गैश्च मानवस्य प्रजायते ॥४॥ तैतिले करणे जातः सौभाग्य धन संयु
तः स्नेहः सर्व जनैः सार्द्धं विविधाणि गृहाणि च ॥५॥ गराख्ये कृषिकर्मा
च गृह कार्य परायणः यद्वस्तु वांछि तं तच्च लभ्यते च महाधने ॥६॥ व
णिजे करणे जातो वाणिज्ये नैव जीवति वांछितं लभते लोको दे तर गमा
गमे ॥७॥ अशुभारंभ शीलश्च पर घात रतः सदा कु शलो विष कार्येषु वि
ष्टाख्ये करणे भवेत् ॥८॥ शकुनौ करणे जातः पौष्टि कादि क्रिया कृति औ
षधादिषु दक्षश्च भिषग्वृत्तिश्च जायते ॥९॥ करणे च चतुष्पादि देवद्विज

१० च
॥२४॥

रतः सदा ॥ गोकर्माण्यो प्रभुश्रेष्ठश्चतुष्पदचिकित्सकः ॥२०॥ नागेच करणे जातः स्था
वरप्रीतिकारकः ॥ कुरुते दारुणां कर्म दुर्भगो लोललोचनः ॥२१॥ किंस्तुघ्ने कर
णे जातः शुभकर्मरतो नरः ॥ तुष्टिं पुष्टिं च मांल्यं सिद्धिं च लभते सदा ॥२२॥
इति करणजन्मफलम् ॥ पिशुनश्चपरो दुष्टः पापकर्मा निराकृति प
रेषां व्यसने सक्तश्चौराश्च प्रथमांशके ॥२३॥ उत्पन्नविभवो भोक्ता संग्राम
विगतस्पृहः ॥ गंधर्वप्रमदासक्तो द्वितीयांशे च जायते ॥२४॥ धर्मिष्ठः संत
तव्याधिः सर्वसारद एव च ॥ सर्वज्ञो देवताभक्तस्तृतीयांशे प्रजायते ॥२५॥
चतुर्थांशेऽभिजातस्तु दीक्षितो गुरुमतिमान् ॥ यत्किंचिद्दुर्लभं वस्तु तत्सर्वं
लभते वसुः ॥२६॥ सर्वलक्षणसंपन्नो राजा भवति विश्रुतः ॥ दीर्घायुर्बहुपुत्र
श्च जायते पंचमांशके ॥२७॥ स्त्रीनिर्जितः सुभीर्नो बहुपापी नपुंसकः ॥ स्व
र्घ्वंसप्रमादी च षष्ठांशे जायते नरः ॥२८॥ विक्रान्तो मतिमान् शूरः संग्रामो

राम
॥२४॥

ष्वपराजितः॥ महोत्साही च संतोषी जायते सप्त मांसके॥१९॥ कृतघ्नो मत्सरी क्रूरः क्लेश भाषी बहुःप्रजः॥ फलकालेपरि त्यागी जायते ऽष्ट मांशके॥२०॥ क्रियासुकु शलो दक्षः सुपुत्रापी जितेन्द्रियः॥ भृत्यैश्चापि वेष्टितो नित्यं जायते च नवांशके॥२१॥ इति जन्म राशि नवांश फलम्॥ सुन्दरो दान शील श्च मतिमान्सवलः सदा॥ स्वल्प भोजी महाप्राज्ञो नरो देवगणो भवेत्॥२२॥ मानी धनी विशालाक्षो लक्ष्य वेदी धनुर्द्धरः॥ गौरः पौर जनाल्हादी जायते मानवे गणे॥२३॥ उन्मादी भीषनाकारः सर्वदा कलिवल्लभः परुषं वदः सह ब्रूते प्रमेही राक्षसे गणे॥२४॥ इति गण फल विचारः॥ अथ ऋतु फलम्॥ रूप यौवन संपन्नो दीर्घ सूत्रो महोत्कटः॥ क्षुधा युतः कार्मुकश्च शिशिरे जायते नरः॥२५॥ महाधर्मी मनस्वी च तेजस्वी बहु कार्य कृत्॥ नाना देश रसासक्तो वसंते जायते नरः॥२६॥

सं० चं
॥२५॥

वकारं जोऽजितक्रोधः कृपालुः कामुको नरः। दीर्घोत्साहो वृद्धिमोक्षश्रीक्षो जातः
सदा शुचिः ॥२७॥ गुणवान्भोगयुक्तश्च राजपूज्यो जितेन्द्रियः कुशलो धातु
वादी च वर्षाकाले भवेन्नरः ॥२८॥ वाणिज्यकृषिवृत्तिश्च धनधान्यसमृद्धि
मान् ॥ तेजस्वी बहुमानश्च शरज्जाते भवेन्नरः ॥२९॥ बहुवीर्यो नीतिते
जा ग्रासयुक्तो सद्धर्मी ॥ ह्रस्वपादगलो भीरुः हैमंते जायते नरः ॥३०॥ इति
ऋतुफलम् ॥ पूर्णचन्द्र नभः श्रीमान् सोद्यमी बहुशास्त्रवित् ॥ कुशलो ज्ञा
नसंपन्नो शुक्लपक्षे भवेन्नरः ॥३१॥ निष्ठुरो दुःखो मूर्खः स्त्रीद्वेषी च जनो
निरतः ॥ जायते च परप्रेष्यः कृष्णपक्षे भवेन्नरः ॥३२॥ इति पक्षफलवि
चारः ॥ महाधनी महामस्त तुंगस्थे भास्करे न्नरः ॥ सुभुवर्णो महाभोगी धनी चं
द्रे च जायते ॥३३॥ उच्चे भौमे सुपुत्रश्च तेजस्वी गर्वितो नरः मेधावी दृढवाक्यश्च

राम
॥२५॥

वत्सारूढस्यश्च वुधे भवेत ॥३४॥ राजपूज्यश्च विख्यातो विद्वा नार्यो गुरौ नरः

सौम्यश्च भृग्वोविलासी च हास्य गीतादि संयुत ॥३५॥ तुंगस्थे भानु पुत्रेश्च

चक्रवर्ती धनि भवेत राजराज्ञानि योगश्च राहुः शनिश्चाम समृतः ॥३६॥ इ

तिश्चन्द्र ग्रह वलम् ॥ धनी सुखी कार्य्य विज्ञ त्रिकोणस्थे दिवाकर ॥ च

न्द्रे धनी च भोक्ता च भोगमेश्वर स्यात् खल ॥३७॥ वुधे त्रिकोणे विज्ञश्च विनो

दी विजयी नरः गुरौ ग्रामपुरादीना मरूस्याधिं पतिन्नरः ॥३८॥ सुके त्रिको

णे सुज्ञश्च सुखयुक्तौ महोत्तमः ॥ मंदे नैरा धनै पर्णी महा शूरः कुल धर ॥३९॥

इति श्री त्रिकोण फलम् ॥ स्वगृहस्थो रवौ सोको महा गश्च महा धर्मी च

न्द्रे धर्मरतः साधु मनिस्वी रूपवानपि ॥४०॥ स्वगृहस्थे वुधे चेंद्र स्वपरो

धनवानपि वुधेनाना कलाभिज्ञ पंडितो धनवानपि ॥४१॥ धनी काव्य

न॰ वं॰
२६॥

श्रुतिज्ञश्च सुवेष: स्वगृहेगुरौ॥ स्फीतिंकृषीवल: शुक्रे शनौ मान्य स्वसेजना:
४२॥ इतिशत्रुगृहफलम्॥ सूर्य्येमित्रगृहे ख्यात शश्चज्ञ: स्थिरसौहृदं
चंद्रे नरो भाग्ययुक्तश्चतुरो धन वानपि॥४३॥ भौमेशश्चोपजीवीच वुधे
रूप धनान्वित: गुरौमित्रगृहेप्राज्ञ: सतां सत्कर्मसंयुत:॥४४॥ शुक्रे मित्र
गृहेलेके धनीवंधुजनप्रिय:॥ शनौपरान्न भोगीच कुकर्मनिरतो भवे
त॥४५॥ इति मित्रगृहफलम्॥ नीचे सूर्य्ये भवेत्प्रेष्यो वांधवैर्व
र्जितोनर:॥ चन्द्रे रोगी स्वल्पपुण्यो दुर्भगो पिचपापने॥४६॥ नीचे भौ
मे भवेन्नीच: कुत्सितो व्यसनातुर: वुधश्चुद्रो वंधवेरी गुरौदीनामला
न्वित:॥४७॥ शुक्रे नीचेनष्टदार: स्वतंत्रस्वीच वर्ज्जित:॥ शनौकारागे
दरिद्रश्च गता चारोति गर्हित:॥४८॥ इतिनवग्रहस्वफलम्॥

राम
॥२६॥

सूर्ये रिपुगृहे निस्पो विषये पीड़ितो नरः॥ चंद्रे हृदय रोगीच भौमे तेजो ज
डो धनः॥४८॥ बुधे रिपु गृहे मूर्खो वाग्धनो दुःखपीड़ितः॥ जीवे च जायते
क्लीवो नापर्वेत्तिर्वुभुक्षितः॥५०॥ शुक्रे शत्रु गृहे मर्त्यः कुबुद्धिः दुःखितो
नरः॥ शनौ व्याध्यर्थशोकेन संतप्तो मालिनो भवेत्॥५१॥ इति शत्रुगृ
हफलम्॥ सुरूपः सुभगी दक्षः स्थूल कायो महा धनी अश्वनीसंभ
वो लोको जायते जनवल्लभः॥५२॥ अरोगी सत्य वादी च सुप्राणश्च
दृढव्रतः॥ भरण्यां जायते लोकः सुमुखी मति मानपि॥५३॥ कृपणः
पापकर्मा च क्षुधार्तुर्नित्यपीडितः॥ अकर्म कुरुते नित्यं कृतिकासंभवो नरः॥५४॥
धनी कृतज्ञो मेधावी नृपमान्यः प्रियं वदः॥ सत्यवादी स्वरूपश्च रोहिण्यां
जायते नरः॥५५॥ चपलश्चतुरो धीरः क्रूर कर्मा स्वकर्मकृत अहंकारी

वें०
२७॥

पर द्वेषी भगे भवति मानवः ॥५६॥ कृतज्ञो गर्वितो हीनो नरः पाप
रतः सदा ॥ आर्द्रा नक्षत्र संभूतो धन धान्य विवर्जितः ॥५७॥ शांतः सु
खी च भोगी च शुभ भोजन वल्लभः ॥ पुत्र मित्रादिभिर्युक्तो जायते च पुन
र्वसौ ॥५८॥ देव धनैर्युक्तो बुद्धि युक्तो विचक्षणः पुष्ये च जायते लोकः
शान्तात्मा शुभगो सुखी ॥५९॥ सर्वभक्षः कृतांतश्च कृतघ्नो वंचकः
खलः आश्लेषायां नरो जातः कृतकर्मश्च जायते ॥६०॥ कल्याणं प्रथ
मे पादे द्वितीये च धनं क्षयः मातृपीड़ा तृतीये च पितुः सर्पे चतुर्थके ॥६१॥
बहुभृत्यो धनी भोगी पिता भक्तो महोद्यमी चमूनाथो राजसेवी मघायां
जायते नरः ॥६२॥ विद्या गो धन संयुक्तो गंभीरः प्रमदाप्रियः पूर्वाफाल्गु
नि कां जातः सुखी पंडित पूजितः ॥६३॥ दाता शूरो मृदुर्वक्ता धनुर्वेद
पंडितः उत्तराफाल्गुनी जातो महायोद्धा जनप्रियः ॥६४॥

राम
॥२७॥

ऋसत्यवचनो धव सुरापो वंधुवर्जितः हस्तेजातो नरश्चौरो जायते पार
दारिकः ॥६५॥ पुत्र दारः पुतस्सुखी धन धान्य समन्वितः देवब्राह्मणा न
कश्च चित्रायां जायते नरः ॥६६॥ वि[illegible] दग्धा धार्मिको स्यात् अर्थवृपनः
प्रियवल्लभः सुखेच देव भक्तश्च स्वाती जातो भवेन्नरः ॥६७॥ अति
लब्धोति मीच निष्ठुरः कलहप्रियः विशाखायां नरो जातो वेश्याजन रतो
भवेत् ॥६८॥ पुरुषार्थप्रवासीच वंधुकार्यो महा धनी अनुराधा भवो
लोकः सदा हृष्टश्च जायते ॥६९॥ बहु मित्र युधानश्च कवि दाता वि
च क्षणः ज्येष्ठा जातो धर्म रतो जायते सद्भूपूजितः ॥७०॥ स्थिरो रोगी
च मानीच धनवांश्च सुखी भवेत् मिथ्यो पचारः स्त्री लोलः मूलजातो
नि[illegible]ति धीलज; ॥७१॥ आद्ये पादे पितुः पीडा मूले मातुर्द्वितीयके

लिं० वं०
॥२८॥

तृतीये धन हानिश्च चतुर्थे सर्वदा सुखे ॥१२॥ स्वल्पमात्रोपकारी च मा
त्सर्वाश्च जनप्रियः पूर्वाषाढ़ नरो जातः सकलार्थे विचक्षणः ॥१३॥ ब
हुमित्रो महाकायो धार्मिको विनयी सुखी उत्तराषाढ संभूतः शूरश्च वि
जयी रणे ॥१४॥ कृतज्ञः शुभगो दाता सर्वदा रोगसंयुता श्री मांश्च चश्र
संजातः श्रवणे जायते नरः ॥१५॥ गीतप्रियो बंधुमान्यो हेम रत्ने रलंकृ
तः जातो नरो धनिष्ठायां एकः शतपति भवेत् ॥१६॥ कृपणो धनपूर्णश्च
परदारोपसेवकः जातः शतभिषायां विदेश गमनो भवेत् ॥१७॥ वक्ता सु
खी प्रजा युक्तो बहुनिद्रा निरर्थकः पूर्वभाद्रपदायां च जातो भवति मान
वः ॥१८॥ गौर समर्थो धर्मज्ञः शत्रुहन्ता च पापरः ॥ उत्तराभाद्रपदायांतो
नरः साहसिको भवेत् ॥१९॥ संपूर्णांगः शुचिर्दक्षः साधुः शूरो विचक्षणः
रेवती संभवो लोको धन धान्यैरलंकृतः ॥२०॥ इति जन्मनक्षत्रफल समाप्तम् ॥ राम
॥२८॥

नंदातिथौ नरो जातो महा मानी च कोविदः देवता भक्ति निष्ठश्च ज्ञानी च प्रिय वत्सल ॥८१॥ भद्रा तिथौ वंधु मान्यो राज सेवी धनान्वितः संसार भय भीतश्च परमार्थ मतिर्नरः ॥८२॥ जया तिथौ राजपूज्य पुत्रपौत्रादि संयुतः शूरः शान्तश्च दीर्घायु महावीर्यश्च जायते ॥८३॥ रिक्ता तिथौ विहीनः प्रमादि गुरुनिन्दकः शास्त्रहन्ता मत्त कर्ता च कामुकश्च नरो भवेत् ॥८४॥ पूर्णा तिथौ धनैः पूर्णो वेद शास्त्रार्थ तत्ववित् सत्यवादी शुद्ध चेता यज्वा भवति मानवः ॥८५॥ इति नंदादि तिथि फलं ॥ इति सर्व शास्त्र विशारद श्री काशीनाथ कृतौ लग्न चंद्रिकायां प्रथम परिच्छेदः ॥१॥ लग्ने सूर्ये तिक्ष्णो स्तीव्रश्च चंचला त्मासमं शूरः नेत्र रोगी पीड़ितांगो जायते चारु साहसः ॥१॥

सूर्ये धने विवादी च बहुभ्रातुश्च निर्द्धनः परापवादी रोषश्च कृतघ्नश्च भवेन्नरः ॥२॥ तृतीयस्थे दिवानाथे प्रसिद्धो रोगवर्जितः भूपतिश्च सुशीलश्च दयालुश्च भवेन्नरः ॥३॥ सूर्ये चतुर्थे दुर्बुद्धिः कृशांगा सुख वर्जितः अप्रभावो निष्ठुरश्च दुष्टसंगी भवेन्नरः ॥४॥ पंच मे केकोप युक्तः कुरूपशील वर्जितः कृशांगस्तब्ध वृत्तिश्च गतमान्यश्च जायते ॥५॥ षष्ठे सूर्ये गतारिश्च ख्यातमान सुधी सुखी सुरानुरागी भूपाल संभ तश्च भवेन्नरः ॥६॥ सप्तमे केकु दारश्च दुष्टप्रीतिश्च पुत्रकः गुह्य रोगी सपापश्च जातको हि प्रजायते ॥७॥ अष्टमस्थे दिवानाथे सुतघ्नो हीन मानसः शत्रुदग्धो वेश्यागामी बंधुहीनश्च जायते ॥८॥ नवमस्थे रवौ जातः कुधर्मो भाग्यवर्जितः विद्याविवेकहीनश्च कुशीलश्च प्रजायते

रामः २७

दुश्मेर्के वंधुहीनः कुधर्मो शीलवर्जितः स्त्रीचंचलो हीन तेजा हीनकशाश्च जाय
ते ॥२०॥ लाभे सूर्ये समत्पन्नो नानालाभ समन्वितः सात्त्विको धार्मिको
ज्ञानी रूपवानपि जायते ॥२१॥ व्यये सूर्ये नरो रोगी सत्वहीनो व्ययी रुणी
प्रसध्यापी पुत्रदार भक्ति हीनश्च जायते ॥२२॥ इति सूर्य स्थानादेश
ग्रह फलम्॥ लग्ने चंद्रे [illegible] कुधः प्रसन्नो धनपूरितः स्त्रीवल्लभो
धार्मिकश्च कृतघ्नश्च नरो भवेत् ॥२३॥ धने चंद्रे धनैः पूर्णो नृपपूज्यो गुणा
न्वितः शास्त्रानुरागी शोभाग्या जनप्रीतश्च जायते ॥२४॥ तृतीये च निशा
नाथे धनविद्याधिभिर्युतः कफाधिकः कामुकश्च वंशमुख्योपि जायते ॥२५॥
चतुर्थे च निशानाथे पुत्रदारा समन्वितः धनी सुखी यशस्वी च विद्यावा
नपि जायते ॥२६॥ सुते चंद्रे सुतान्नश्च रोगकामी सदा भवेत् क्वचिमेः
पौरुषे युक्तो विनयी च भवेन्नरः ॥२७॥ षष्ठे चंद्रे वतहीनो भ्र दुकार्येति

सु वं०
॥२०॥

मद्यकर्षणेति लालसः मद्यागिन स्तीव्रा दष्टि रुच श्शूरोपि मनुजोभवेत ॥१७॥
चंद्रे च सप्तमो जाते दुःखी कष्टी व्ययकः प्रगल्भश्च कृशांगश्च पापबुद्धि
र्भवेन्नरः ॥१८॥ धर्मेचन्द्रे चारू कान्तिः स्वधर्म निरतः सदा कृपणो वकु वै
रिच जायते पर दारिकाः ॥२०॥ वीनो यमः सतां भस्त्वा पापहीन रुच जाय
ते ऋषप्रेतार का नष्टो दीनोऽल्पायुः स कष्टकः ॥२१॥ कर्मस्थाने सुधा
रस्सौ बहुभाग्यो महा धनी मन स्वीय मनोज रुच राज्य मान श्च जायते ॥२२॥
लाभ
लाभे चन्द्रे [illegible] युक्तः प्रडालुर्विगतो भयः सुमार्गगामी स्त्जालुः प्रतापी
भाग्यवान्भवेत् ॥२३॥ व्यये चन्द्रे पाप बुद्धि र्बहु नद्दी पराजितः कुला
धमोऽ सद्याप्यच्चि विकारी जातको भवेत ॥२४॥ इति चन्द्र फलम् ॥ भौमे
लग्ने कुरूप श्च रोगी बंधु विवर्जितः असत्यवादी निर्द्रव्यो जायते परद
रिकः ॥२५॥ धने कुजे धनैर्हीनिः कृपामित रुच कुबुद्धिकः दीर्घ सूत्रोऽसत्यवादी
क्रो

राम
॥२०॥

पुत्रवानपिजायते ॥२६॥ तृतीयस्थे कुजे जातः प्रतापी शौर्यसंयुतः । रणेऽथवा
ऽपि राज्यमान्यो भुवि ख्यातश्च जायते ॥२७॥ चतुर्थे भूसुते रूक्ष पितृधनक्ष्यो
ऽपि स्रीधोर्जितः । व्यथा हृदि हीनपुत्रो महाकामी च जायते ॥२८॥ पंचमे च धरा
पुत्रे कुसंतानी सदा रुजः । बंधुर्गो विरतश्च नरो दीनोऽपि जायते ॥२९॥ षष्ठे
भौमो शत्रुहीनो नानार्थैः परिपूरितः । स्त्रीलालसः पुष्टदेहः शुभवित्तश्च
जायते ॥३०॥ सप्तमे भूमिपुत्रे च रुधिरात्क्षतिकोपवान् नीचसेवी वंच
कश्च निर्गुणोऽपि भवेन्नरः ॥३१॥ अष्टमे मंगले कृशः स्वल्पायुः शस्त्र
पीडितः । अल्पद्रव्यः सरोगश्च निर्गुणोऽपि भवेन्नरः ॥३२॥ धर्मस्थे धरणी
पुत्रे कुधर्मी गतपौरुषः । नीचानुरागी क्रूरश्च सकष्टश्च प्रजायते ॥३३॥
कर्मस्थाने भौमे पुत्रे शुभकर्मशुभान्वितः । सुपुत्री च सुखी शूरो गर्वितोऽपि भवेन्नरः ॥३४॥ राम

३०॥

सं. वं.
॥३१॥

लाभे भौमे भूरि लाभो नाना पाना न्नभक्षकः निरोगी नृपमानश्च देवद्वि
जरतो भवेत॥३५॥ व्ययस्थापी व्यये भौमे नास्तिको निष्ठुरः सदाः वहुवैरी
विदेहेच सदा गच्छतिमानवः॥३६॥ इति भौमफलम॥ लग्नेवुधेच
गीतज्ञो निःपापी नृपपूजितः रूपवान् शीलसंयुक्तं प्रसन्नो मानवो
भवेत॥३७॥ चन्द्रपुत्रे धनस्थाने धन धान्यादिपूरितः शुभकर्मा सुखी
नित्यं राज्यश्च जायते॥३८॥ तृतीयेचवुधे जातः प्रख्यातोवंधुमानितः
धर्मध्वजी यशस्वीच गुरुवाक्पालको भवेत॥३९॥ चतुर्थे चंद्रपुत्रेच
वहुभृत्य यशोन्वितः पटुवाक्यो भाग्ययुक्तं सत्यवादीच जायते॥४०॥
पंचमे रोहिणी पुत्रो पुत्रपौत्री समान्वितः सुबुद्धिः सुखसंपन्नो सुखी
भवतिमानवः॥४१॥ षष्टे वुद्धे विपं शश्च विरोधी सर्ववंधुषु दृष्ट्या

राम
॥३१॥

धिकः कामचोरो विद्वानपि भवेन्नरः ॥४२॥ सप्तमे सोमपुत्रे च रूपविद्याधिको नरः

सुशीलः कामशास्त्रज्ञो नारीमान्यश्च जायते ॥४३॥ बुधेऽष्टमे कृतघ्नश्च कुबुद्धिः पर

दारिकः कामातुरो सत्यवादी रोगयुक्तो भवेन्नरः ॥४४॥ धर्मे बुधे धार्मिकश्च कृपा

रामादिपारकः सत्यवादी च दांतश्च जायते पितृवत्सलः ॥४५॥ कर्मे च बुधे जातो

धनधान्ययशोधितः वक्ता नयश्च विनयी कांतियुक्तश्च मानवः ॥४६॥ लाभे सौ

मे नित्यलाभो नीरोगश्च सदा सुखी जानुरोगी चित्तश्च कीर्तिमानपि जायते ॥४७॥ ॥४८॥

बुधे व्यये व्ययी लोको रोगी बंधुसमन्वितः पापरतः परा भीनः परपदी च जायते

इति बुध फलम् ॥ लग्ने गुरौ सुशीलश्च प्रगल्भो रूपवानपि रूपमनीषश्च नीरो

गो ज्ञानी सौम्यश्च जायते ॥४९॥ धने जीवे धनी लोकः कृतज्ञो बंधुसंयुतः गा

वश्च महिषीयुक्तः कान्तिमानपि जायते ॥५०॥ जीवे तृतीये तेजस्वी कर्म

दक्षो जितेन्द्रियः मितवादी सुखसंपन्नः तीर्थवार्ती प्रियो भवेत् ॥५१॥ सुखे

जीवे सुखी लोकः सुभगो राजपूजितः विजितारिकुलाध्यक्षी गुरुभक्तश्च जायते ॥५२॥

चं०
सू०र॥

सुतेजीवे सुतैर्युक्तो धार्मिकः पंडितः सुखीः सुद्ध चेता दया युक्तो विनयीच भवे
न्नरः॥५३॥ षष्टे गुरौ विघ्न युतो वक्रु शत्रु श्च निष्ठुरः उद्वेगी मतिहीनश्च कामुको
जायते जनः॥५४॥ सप्तमेच सुराचार्य्ये काम चित्तो महागर्वः धनी दाता प्रगल्भ
श्च चित्र कर्मा च जायते॥५५॥ जीवेष्टमे सदा रोगी कृपणाः शोकयुतः वक्रुवे
रीकुकर्मा च कुरूप श्च नं वे नरः॥५६॥ धर्मे जीवे कर्म कर्त्ता साधु संगीच
शास्त्र वित् निरीह स्तीर्थसेवीच व्रस्मज्ञश्च प्रजायते॥५७॥ कर्मस्थाने सुराचा
र्य्ये पुन्य कीर्त्ति सुखान्वितः राजतुल्यः स्वरूप श्च गुणवानपि जायते॥५८॥
व्यये वक्रु स्पंतौ रोगी व्यसनी परधर्मकृत वं धुवैरीच सेवी च गुरु द्वेषीच जाय
ते॥५९॥ इति गुरुवलम॥ लग्ने शुक्रे सुशीलश्च विता वा नति सुन्दरः शुद्धि
विद्यात्मनो ज्ञश्च धार्मिश्चिच भवेन्नरः॥६०॥ धने शुक्रे धनी विद्वान् वंधु मान्यो
रूपान्वितः यशस्वी गुरुभक्तश्च कृत ज्ञश्च भवेन्नरः॥६१॥ तृतीये भार्गवे जातो

राम
॥३२॥

नीरोगः सुखसंपन्नो बहुभाग्यश्च जायते ॥६१॥ अष्टमस्थे दैत्यपूज्ये सरोगः क्रूरविग्रहः ॥ ६१॥

धनदारसुताधिकः ~~ग्रामा~~धिपो यशस्वी च विवेकी च भवेन्नरः ॥६१॥ नीरोगो राजमानां च प्रतापी च प्रजायते ॥६२॥ सुखे शुक्रे सुखी विज्ञो बहुभार्यो धनाधिकः ग्रामाधिपो यशस्वी च विवेकी च भवेन्नरः ॥६३॥ सुते शुक्रे सम्पन्नः श्च सुरूपश्च सदान्वितः दुःसंगिकलहो वैरी विदेषी च सदा नरः ॥६४॥ सप्तमे भृगुपुत्रे च धनी बन्धुगुणान्वितः वपा रामी कार्यहीनो जनानां च प्रियो भवेत् ॥६५॥ धर्मे शुक्रे धर्मपूर्णो ज्ञानवृद्धः सुरूपी धनी नरेन्द्रमान्यो विनयी नराणां च प्रियो भवेत् ॥६६॥ कर्मस्थिते भृगुपुत्रे शुक्रकर्मा निधिरत्नवान् राजसेवी धार्मिकश्च सभ्यो जायते दयिता प्रियः लाभशुक्रे सदा लाभो यशः सत्यगुणान्वितः धनी भोगी क्रियाशुद्धो जायते मानवोत्तमः ॥६७॥ व्यये शुक्रे व्ययस्थाश्च बहुर्मित्रविरोधवान् मिथ्यावादी बंधुवर्गो गुणा[illegible]ः हीनोऽपि जायते ॥६८॥ इति शुक्रफलम् ॥ लग्ने शनौ सदा रोगी कुरूपः रूपहीनो नरः कुशीलः पापबुद्धिश्च ग्रहश्चापि भवेत् ध्रुवं ॥७०॥

चं. ५८

ष्ने मन्दे धने हीनो वातपित्तकफातुरः देहस्यास्थिर रोगश्च गुरोः स्वल्पोपि जायते ॥११॥
छायात्मजे त्रितीये प्रसन्नो बल वत्सलः शत्रुमर्दी नरैर्मान्यो धनीशूरश्च जायते ॥१२॥
सुखे मन्दे सुखै हीनो हता धीवांधवैर्न्नरः गुणाः स्वभावो दुःसंगीकुनैश्चावृतः सहः
॥१३॥ पुत्रे मंदे पुत्रहीनः क्रिया कीर्ति विवर्जितः हीनम्रो को विरूपश्च मानवो भवति
ध्रुवं ॥१४॥ शत्रुस्थाने स्थिते मंदे शत्रुहीनो महाधनी पशुपुत्रयशो युक्तो नीरोगो जा
यते नरः ॥१५॥ कलत्रस्थो मित्रपुत्रे कुकलत्रो बरुजान्वितः वंधु शत्रु विवादश्च
कृशश्च मलिनो भवेत् ॥१६॥ क्रोधातुरोष्टमो मंदे दारिद्रो वाद्र रोगवान् मिथ्या
विवादकर्त्ता च पुरुषो भवितचेन्नरः ॥१७॥ धर्ममंदे धर्महीनो निर्विवेकी प्रियोव
शः न्रशंसो जायते लोक परदाररतः सदा ॥१८॥ कर्मस्थाने सूर्य्यपुत्रे कुकर्मा
धनवर्जितः दयासत्याच्युतौ हीनश्च वसो पि भवेन्नरः ॥१९॥ छायात्मजेच

राम ५८

रान्नेच सर्वविद्या विशारदः पुरोपमाढ्ये विपरीतो पूज्यमान्यो शुचिर्भवेत् ॥ ८० ॥
अस्त ह्यापी व्ययेमंदकृत ह्यो वित्त वर्जितः बंधुवैरं कुवे रश्चु चंचलोपि नरस
दा ॥ ८१ ॥ इति स्थानि फलम् ॥ अथ मस्त्री लग्न विचारः ॥ लग्ने च सप्तमे पापे स
प्तमे वत्सरे पतिः म्रियते चाष्टमे वर्षे चन्द्रः षष्ठाष्टमे यदा ॥ ८२ ॥ गुरौ शुक्रे मृता
पत्या मृत गमचि मंगले अष्टमस्थो ग्रहो नूनं न स्त्रियाः शोभनो मतः ॥ ८३ ॥
एकोनार्थी भवेत्पुत्रः पंचमस्थो यदा रविमंगले च प्रयाः पुत्रा गुरौ पंच प्रकी
र्तिताः ॥ ८४ ॥ पंचमस्थो निशा नाथे स्त्रियाः कन्या द्वयं भवेत् बुधे कन्या श्च त
स्त्रश्च शुक्रे शप्तच कन्यकाः ॥ ८५ ॥ षड्व कन्या जायंते धर्म स्थाने यदा सितः
सप्तमे च यदा राहुः स्त्रियाः पुत्रस्तदा भवेत् ॥ ८६ ॥ सरूपा मार्ग वेलग्ने चोद्धे वा
